**दिनाङ्क :-03.11.2024** **प्रात: - 06:55**

**अथ वार्ताः**

**भारत-ग्रीस**

भारतस्य प्रधानमन्त्री नरेन्द्र मोदी ग्रीसस्य प्रधानमन्त्री किरियाकोस मित्सो-ताकिसश्च द्वयोः देशयोः मध्ये रणनीतिकसंबन्धं प्रबलं कर्तुं स्वप्रतिबद्धतां पुनरुक्तवन्तौ। दूरवाणी-संवादस्य माध्यमेन उभौ नेतारौ भारत-मध्य-पूर्व यूरोप-आर्थिक-विषये च पश्चिम एशियायाम् विकासेन च सह विभिन्न-क्षेत्रीयाणाम् वैश्विक- समाह्वानानां च विषये चर्चां कृतवन्तौ। तौ व्यापार- रक्षा-नौकावहन- सम्पर्क -इत्यादिषु द्विपक्षीयसहयोगानाम् अनेकेषु क्षेत्रेषु प्रगतेः समीक्षां कृतवन्तौ। संवादे, श्री मित्सो-ताकिसः भारते निर्वाचने पुनर्निर्वाचिते सति श्रीमोदिने वर्धापनानि प्रेषितवान्।

**जयशंकर-ऑस्ट्रेलिया सिंगापुर :**

विदेशमंत्री डॉ.एस जयशङ्करः अद्य आरभ्य आस्ट्रेलिया सिंगापुर देशयोः षड् दिवसीय यात्रायां भविष्यति। विदेशमन्त्री डॉ.एस जयशङ्करः ब्रिस्बेन्-नगरं सम्प्राप्य आस्ट्रेलिया-देशे भारतस्य चतुर्थ-वाणिज्यदूतावासस्य उद्घाटनं करिष्यति। सः कैनबरानगरे स्वस्य आस्ट्रेलियादेशीय समकक्षेण पेनी वोङ्ग् इत्यनेन सह पञ्चदशतमे विदेशमन्त्रिरूपरेखासंवादस्य सहअध्यक्षः अपि भविष्यति। विदेशमन्त्री आस्ट्रेलियादेशस्य संसदभवने आयोजितस्य द्वितीयस्य रैसिना डाउन अण्डर इत्यस्य उद्घाटनसत्रे मुख्यभाषणं प्रदास्यति।

यात्रायाः द्वितीये चरणे डॉ. जयशंकरः अस्मिन् मासे अष्टमे दिनाङ्के आधिकारिक यात्रायै सिङ्गापुरं गमिष्यति, यस्मिन् सः आसियान - इण्डिया नेटवर्क आफ् थिंक टैंक्स् इत्यस्य अष्टमं वृत्तोत्पीठिका इति राउंडटेबल सम्मेलनं सम्बोधयिष्यति। सः सिङ्गापुरस्य नेतृत्वेन सह मिलित्वा द्वयोः देशयोः सहभगितायाः समीक्षां करिष्यति तथा च द्विपक्षीयसम्बन्धं इतोप्यधिकं सम्वर्धनाय चर्चा करिष्यति।

**राजनाथ रक्षानिर्यात :**

रक्षामन्त्रिणा राजनाथसिंहेन उक्तं यत् भारतस्य आत्मनिर्भर-अभियानं वांछित परिणामः प्रददाति तथा च देशः ऊनविंशत्यधिक द्विसहस्र, त्रिंशोत्तर द्विसहस्र तमवर्षपर्यन्तं रक्षानिर्यातस्य पञ्चाशत् सहस्र कोटिरूप्यकाणि यावत् प्राप्तुं सज्जः अस्ति। भारतीय प्रौद्योगिकीसंस्थाने (IIT), कानपुरे पञ्चषष्ठी तमं स्थापनादिवसोत्सवं सम्बोधयन् रक्षामन्त्री भारतीय यूनां आह्वानं कृतवान् यत् ते उच्चस्तरीयप्रौद्योगिकीनां स्वदेशीयरूपेण विकासं कुर्वन्तु, येषां देशः आयातं करोति, येन प्रधानमन्त्रिणः नरेन्द्रमोदिनः 'विकसितभारतस्य' दृष्टिकोणः साकारो भविष्यति।

**अमितशाह झारखंड**

भाजपायाः-वरिष्ठनेता तथा केन्द्रीयगृहमन्त्री अमितशाहः गतसायं राँची-राज्ये संप्राप्तवान् । श्रीशाहः राज्यभाजपानेतृभिः साकं निर्वाचनस्य सज्जतायाः समीक्षां करिष्यति। झारखण्ड विधानसभानिर्वाचनस्य प्रभारी शिवराजसिंहचौहानः उक्तवान् यत्, श्रीशाहः अद्य भाजपादलस्य संकल्पपत्रस्य विमोचनं करिष्यति। केन्द्रीयमन्त्री अद्य घाटशीलायाः धालभुमगढे, हजारीबागस्य बरकट्ठायां, चतरायाः सिमरियायां च नैर्वाचनिकजनसभां सम्बोधयिष्यति। इदानीं निर्वाचने धनशक्तेः प्रभावं अवरोधयितुं राज्ये सर्वत्र अन्वेषणकार्यक्रमाः तीव्रगत्यां प्रचलन्ति। माओवादिनः गृहीतुं उत्तरप्रदेश, बिहार, मध्यप्रदेश, छत्तीसगढ, ओडिशा राज्यानां सीमान्तक्षेत्रेषु संयुक्ताभियानाः समारब्धाः सन्ति।

**अनन्तनाग-आतंकी**

कश्मीरोत्पत्यकायां अनन्तनाग-जनपदे हलकन-मार्गिका क्षेत्रे सुरक्षा-बलै: सह जाते संघर्षे त्रयः आतंकिनः मारिताः। श्रीनगरे स्थितस्य चिनार-कोरस्य जनसम्पर्क-पटलानुसारेण क्षेत्रे केषाञ्चित् आतंकिनां वर्तमानस्थितेः प्राप्त सूचनानन्तरं आरक्षि-बलै:, सुरक्षा बलैश्च क्रियान्वयनं प्रारब्धम्। अपरत्र श्रीनगरस्य खन्यार-क्षेत्रे सुरक्षा-बलानां आतंकिनां च मध्ये गोलिका प्रहारा: अभूवन् ।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादने भविष्यति। कृपया श्रृण्वन्तु।

**।।इति वार्ता:।।**